DAV PUBLIC SCHOOLS, ODISHA ZONE
PERIODIC TEST- 1I, 2023-24

- Please check that this question paper contains 0**4** printed pages.
- Check that this question paper contains **8** questions.
- Write down the serial number of question in the left side of the margin before attempting it.

**CLASS-VI**
**SUBJECT- LOWER SANSKRIT**

**Time- 1hr. 30 min** **Maximum Marks- 40**

## खण्ड: - "क" (अपठितगद्यांश:)

**1. अधोलिखितगद्याशं पठित्वा प्रश्नान् उत्तरत।**

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। इयं भाषा भारतस्य सर्वासां प्रान्तीयभाषाणां जननी अस्ति । संस्कृतभाषायाः साहित्यम् अतिविशालम् अस्ति। विश्वस्य प्राचीनतमः ग्रन्थः ऋग्वेदः अस्याम् एव भाषायाम् अस्ति । आदिकाव्यं रामायण, महाभारतं च अस्याम् एव भाषायां लिखितम्। महाकविकालिदासेन विरचितम् नाटकम् 'अभिज्ञानशाकुन्तलम्' विश्वप्रसिद्धम् नाटकं मन्यते ।

**I. एकपदेन उत्तरत-** [1×2=2]

(i) संस्कृतभाषा केषां जननी अस्ति ?

(ii) विश्वस्य प्राचीनतमा भाषा का अस्ति ?

**II. पूर्णवाक्येन उत्तरत।** [2×1=2]

किम् विश्वप्रसिद्धम् नाटकं मन्यते ?

**III. निर्देशानुसारम् उत्तरत लिखत-** [1/2×2=1]

(i) "प्राचीनतमः ग्रन्थः" अनयोः पदयोः विशेष्यपदं किम् ?

(क) प्राचीनतमः (ख) ग्रन्थः (ग) विश्वस्य (घ) नाटकम्

(ii) "माता" इति अर्थे किम् पदम् अत्र अस्ति ?

(क) जननी (ख) प्राचीनतमा (ग) साहित्यम् (घ) सा

## खण्ड: - "ख" (रचनात्मक-कार्यम्)

**2. चित्रानुसारं मञ्जूषातः उचितपदै: रिक्त-स्थानानि पूरयत।** [1×5=5]



(i) एषा __________।



(ii) एष: _________।



(iii) एतत् _________।



(iv) _______ शयनं करोति।



(v) _______ क्रीडन्ति।

| सिंह:, | विद्यालय:, | बाला:, | वायुयानम्, | घटिका |
|---|---|---|---|---|

## खण्ड: - "ग" (अनुप्रयुक्त-व्याकरणम्)

**3. विकल्पेभ्यः उचितशब्दं चित्वा लिखत।** [1×4=4]

(i) __________ विद्यालयं गच्छामः।

(क) सः (ख) अहम् (ग) त्वम् (घ) वयम्

(ii) _________ मार्गे क्रीडति।

(क) बालकः (ख) बालकौ (ग)बालका: (घ) बालके

(iii) ___________ संस्कृतं पठामि।

(क) ते (ख) अहम् (ग) त्वम् (घ) वयम्

(iv) __________ सत्यं वदन्ति।

(क) बालका: (ख) बालकः (ग) बालकौ (घ) वयम्

**4. विकल्पेभ्यः उचितधातुरूपं चित्वा लिखत।** [1×4=4]

(i) अहं देवालयं ____________।

(क) गच्छति (ख) गच्छसि (ग) गच्छामि (घ) गच्छ

(ii) त्वं अद्य व्याकरणं ______________।

(क) लिखामि (ख) लिखसि (ग) लिख (घ) लिखति

(iii) बालकौ संस्कृतं __________________।

(क) पठति (ख) पठतः (ग) पठन्ति (घ) पठामः

(iv) वयं कन्दुकं ____________।

(क) क्रीडति (ख) क्रीडसि (ग) क्रीडामः (घ) क्रीड

**5. रेखांकितवाक्येषु उपसर्गान् चित्वा लिखत।** [1×3=3]

(i) मातृभूमेः सेवार्थं सा भारतीय वायुसेनां **<u>प्राविशत्</u>** ।

(ii) सः गृहं **<u>आगच्छति</u>**।

(iii) हरिणः वने **<u>विहरति</u>**।

**6. . विपरीतार्थक शब्दान् चित्वा लिखन्तु-** [1×4=4]

(i) मूर्ख ____________________।

(ii) दुःखी ____________________।

iii) सत्यम् ____________________।

(iv) बुद्धिहीन ____________________।

| | | | |
|---|---|---|---|
| बुद्धिमान्, | सुखी, | असत्यम्, | विद्वान् |

## खण्ड: - "घ" (पठित-अबवोधनम्)

**6. अधोलिखितगद्याशं पठित्वा प्रश्नान् उत्तरत।**

अस्माकं भारतमाता वीराणां जननी अस्ति । अनेके वीरबालकाः वीरबालिकाः च भारतभूमौ उत्पन्नाः अभवन्। गुञ्जनसक्सेना अपि एतादृशी एका वीरवालिका उत्पन्ना अभवत् । मातृभूमेः सेवायै सा स्वजीवनस्य चिन्तां न अकरोत् । सा 'डी.ए.वी. ' इति संस्थायाः हंसराज-महाविद्यालयस्य छात्रा

आसीत्। मातृभूमेः सेवार्थं सा भारतीय वायुसेनां प्राविशत् । सा प्रथमा भारतीया महिला विमान चालिका आसीत् । सा वीराङ्गना राज्ञी लक्ष्मीबाई इव साहसिनी आसीत् ।

**I. एकपदेन उत्तरत।** [1×2=2]

(i) अस्माकं भारतमाता केषाम् जननी अस्ति ?

(ii) कस्या: सेवायै सा स्वजीवनस्य चिन्तां न अकरोत् ?

**II.पूर्णवाक्येन उत्तरत।** [2×1=2]

गुञ्जनसक्सेना 'डी.ए.वी.' इति संस्थायाः कस्य महाविद्यालयस्य छात्रा आसीत् ?

**III. निर्देशानुसारम् उत्तरत।** [1/2×2=1]

(i)"**भारतीया महिला**" अनयो: किम् विशेषणम् ?

(क) भारतीया ` (ख) महिला (ग) आसीत् (घ) सा

(ii) **"वीराणां जननी अस्ति"** इत्यत्र क्रियापदं किम् ?

(क) वीराणाम् (ख) जननी (ग) अस्ति (घ) सा

**7. अधोलिखितपद्याशं पठित्वा प्रश्नान् उत्तरत।**

भोजनम् न खादति पिबति न जलम् ।
निरन्तरम् चलति बोधयति च समयम् ॥

**I. एकपदेन उत्तरत।** [1×2=2]

(i) घटिका किम् न खादति ?

(ii) घटिका किम् न पिबति ?

**II.पूर्णवाक्येन उत्तरत।** [2×1=2]

का भोजनं न खादति, जलं न पिवति परन्तु निरन्तरं चलति ?

**III. निर्देशानुसारं उत्तरत।** [1/2×2=1]

(i) **"भोजनम् न खादति"** इत्यत्र क्रियापदं किम् ?

(क) भोजनम् (ख) न (ग) खादति (घ) घटिका

(ii) **"सर्वदा"** इत्यस्य किम् पर्यायपदं पर्युक्तम् ?

(क) निरन्तरम् (ख) भोजनम् (ग) न (घ) जलम्

**8. स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुर्वन्तु-** [1×5=5]

(i) माता **बालकं** प्रतिदिनम् अपाठयत् ।

(क) कम् (ख) काम् (ग) कः (ख) कस्मात्

(ii) बालक: **मातरम्** अपृच्छत् ।

(क) का (ख) काम् (ग) कः (ख) कस्मात्

(iii) **वालकः** परिश्रमी आसीत् ।

(क) का (ख) काम् (ग) कः (ख) कस्मात्

(iv) **माता** अस्माकं मार्गदर्शिका भवति ।

(क) का (ख) काम् (ग) कः (ख) कस्मात्

(v) माता **स्वर्गात्** उच्चतरा भवति ।

(क) का (ख) काम् (ग) कः (ख) कस्मात्

## BONUS

1. अधोलिखितानुच्छेदं पठित्वा प्रश्नान् उत्तरत। [1×4=4]

एकदा एका कर्तव्यपरायणः नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीय महापुरुषम् अपश्यत् । सः आम्रवृक्षस्य आरोपणे तल्लीन आसीत् । इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत् - अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा परिश्रमं कुर्वन्ति भवन्तः ? महापुरुषः हसित्वा अवदत् पश्यन्तु एतान् फलयुक्तान् वृक्षान्। एतेषाम् आरोपण मया न कृतं परं फलानि अहं खादित्या सन्तुष्टः भवामि । अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि। महापुरुषस्य वचनं श्रुत्वा तं च नमस्कृत्य नगररक्षकः उक्तवान्- अनुकरणीया एव सज्जनानां सज्जनता ।

**प्रश्नाः**

1. कीदृश: नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीय महापुरुषम् अपश्यत् ?
2. नगररक्षकः कीदृशं महापुरुषम् अपश्यत् ?
3. कः अवदत्- "अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा परिश्रमं कुर्वन्ति भवन्तः ?
4. केषां सज्जनता अनुकरणीया भवति ?